सर्वकार्य्यावसादकः" रामा०। २कार्य्याक्षमतासम्पादके च ।

**अवसादन** न० अव+सद णिच्–भावे ल्युट् । १विनाशने २कार्य्याक्षमतासम्पादने सुश्रुतोक्ते ३व्रणचिकित्साभेदे च "अपतर्पणमालेप" इत्युपक्रम्य "व्रणधूपनमुत्सादनमवसादनम्" इत्यादिना षष्टिरुपक्रमा दर्शिताः "उत्सन्नमृदुमांसानां व्रणानामवसादनम्" इति च तत्र दर्शितम् ।

**अवसान** न० अव+सो–ल्युट् । १विरामे, २समाप्तौ, ३सीमायां, ४समापने ५मृत्यौ च । "न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते" उ०त० स्मृतिः । "विरामोऽवसानम्" पा० "होमावसाने कृततूर्य्यनादः" हेमा०दा०ख०पुरा० । "दोहावसाने पुनरेव दोग्ध्रीम्" "तच्छिष्याध्ययननिवेदितावसानाम्" । "दिनावसानोत्सुकबालवत्साम्" इति च रघुः "ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा" मनुः । "दिवावसानच्छायेव" शकु० अवस्यति स्थाप्यतेऽस्मिन् "आधारे ल्युट् । ६स्थाने । "अदाभ्योऽवसानं पृथिव्याः य० १२, ४५, "अवसानं स्थानमिति" वेददी०।

**अवसाम** न० अवरं साम अच् समा० । अधमसामनि अरण्यादौ अन्त्यकर्म्मणि च गेये सामनि ।

**अवसाय** पु०अव+सो–घञ् । १समाप्तौ, २शेषे, ३निश्चये च । ल्यप् । ४समाप्येत्यर्थे ५निश्चित्येत्यर्थे च अव्य० ।

**अवसायक** त्रि०अव+सो–ण्वुल्। १निश्चयकारके २समापके च।

**अवसिक्त** त्रि०अव+सिच–क्त । १कृतसेके २आप्लुते ३स्नाते च

**अवसित** त्रि०अव+सो–क्त । १समाप्ते, "वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः" कुमा०। "अवसितं हसितं प्रसितं मुदा" भट्टिः । २ऋद्धे, ३ज्ञाते, ४परिपक्वे ५निश्चिते, च ६गृहीतधान्ये न० । अव+सि–क्त । ७संबद्धे त्रि० ।

**अवसृष्ट** त्रि० अव+सृज–क्त । १दत्ते २त्यक्ते ३निःसृते च ।

**अवसे** अव्य०अव–तुमर्थे असेन् । रक्षितुमित्यर्थे । "आयात्विन्द्रोऽवस उप" य० २०, ४७ ।

**अवसेक** पु०अव+सिच–भावे घञ् । समन्तात्सेचने । "अवसेको भवेद्वस्तेस्तस्मात् दोषान् विवर्ज्जयेदिति सुश्रुतोक्ते नेत्रवस्तिरोगभेदे च ।

**अवसेकिम** पु०असेकेन निर्वृत्तः अवसेक+इमन् । वटकभेदे ।

**अवसेचन** न० अव+सिच+ल्युट् । १समन्तात्सेचने शोणिताधोनिस्सारणे "शोणितावसेचनोपाया जलौकसः सुश्रु० रोगभेदे च तिक्तकाद्रुमपत्राणां कार्य्यः क्वाथोऽवसेचने" सुश्रु० ।

**अवसेय** त्रि० अव+सो–कर्म्मणि यत् । १निर्णेये २समाप्ये च

**अवस्कन्द** पु०अव+स्कन्द–आधारे घञ् । जिगीषूणां सैन्यनिवेशस्थाने १शिविरे। भावे घञ्। २अवतरणे, ३आक्रमणे च

**अवस्कन्दन** न० अव+स्कन्द–ल्युट् । १सर्व्वाङ्गेणावगाहने, २अवतरणे, ३आक्रमणे च ।

**अवस्कर** पु० अव+कृ–अप् सुट् । विष्टादिमले । "वर्चस्कोऽवस्करः" पा० "कुत्सितं वर्चः वर्चस्कमन्नमलम्" सि०कौ । मलमात्रे च । "गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्" मिता०ना० स्मृ०। अस्मिन् पक्षे च पृ० सुट् इति भेदः । १अपादाने अप् । २गुह्यदेशे उपस्थादौ । अवस्करे जातः वुन् । अवस्करकः अवस्करभवे त्रि० ।

**अवस्कव** त्रि० अव+स्कु–अच् । हिंसके "अवस्कवं व्यध्वरं क्रमीन् अथ० २, ३१, ४ ।

**अवस्तरण** न० अव+स्तृ–भावे ल्युट् । १विस्तारे । "अवनयनावस्तरणे चावटवत्" कात्या० ५, ५, १४ ।

**अवस्तात्** अव्य० अवरस्मिन् अवरस्मात् अवरमित्यर्थे अस्ताति अवादेशः । अवरकालादौ । अवस्तात् रमणीयम्, आगतः, वसति वा। "अवस्तात् स्वर्गलोकं प्रापयन्तः" शत०ब्रा०

**अवस्तार** पु०अव+स्तृ–कर्म्मणि घञ्। (परदा) इति ख्यातायां १जवनिकायाम्, २आस्तरणे च ।

**अवस्तु** न० कुत्सितार्थे न०त० । अपकृष्टे पदार्थे "अवस्तुनिर्बन्धपरे ! कथं नु ते" कुमा० ।

**अवस्था** स्त्री अव+स्था–अङ् । १कालकृतायां देहादेर्दशायाम् २अवस्थाने च । अवस्था च कालकृतः भावविकारभेदः "जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति" यास्कोक्तः षड्विधः । शास्त्रकारैस्तद्भेदोविषयभेदादन्यो दर्शितः । यथा "यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः" अविद्याऽस्मितारागद्वेषाभिनिवेशाभिप्रायेण योगशास्त्रे पञ्चावस्था दर्शिताः । सांख्यमते कार्य्याणां कारणात्मकतया सूक्ष्मरूपेण कारणे स्थितत्वात् उत्पत्तेः प्राक् याऽवस्था प्रागभावस्थानीया सा अनागतावस्था, ततःकारकव्यापारेण व्यक्ता अभिव्यक्तावस्था ततः ध्वंसस्थानीया कारणलयरूपा तिरोभावावस्था इत्येवं त्रिविधा । वेदान्तिमते जाग्रत् स्वप्नसुषुप्तिरूपा जीवस्यावस्था मोक्षावस्था चेति चतस्रोऽवस्था इत्यञ्च शा०सू० "मुग्धेऽर्द्धसम्पत्तिः" इत्यनेन मुग्धावस्थायाः सुषुप्तावेवान्तर्भावो दर्शितः" "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशात् यौवनं तु ततः परम्। आ षोड़शाद्भवेद्बालस्तरुणस्तत उच्यते। वृद्धस्तु सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम्" इति च स्मृत्युक्ता अवस्था अष्टौ